CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सिद्धांततद्भेदकल्पनातदीयाव्यर्थेति भावः॥
तत्रोत्तरं यत्किंचिदिति सतसबीजेयासांवायत्किं
चिद्गुणनभजनादिप्रकारेणगणितंक्रियते न
सर्वं त्रैराशिकमेवनात्रसंशयः किंतु तन्निर्म
लधियांसूक्ष्मार्थावगमशक्तमतीनामेवाव
गम्यंज्ञातुं शक्यंनास्मदादिभिस्तद्बूहनेकर्तुं
शक्यमतोस्मदादिजडधियामपिधीवृद्धिर्ग

यत्किंचिद्गुणभागहारविधिनाबीजेत्र
वागण्यते तत्त्रैराशिकमेवनिर्मलधिया
मेवावगम्यंविदां एतद्यद्बहुधास्मदा
दिजडधीधीवृद्धिबुद्ध्याबुधैस्तद्भेदा
सुगमान्विधायरचितंप्राज्ञैःप्रकीर्णा
दिकं २ इतिश्रीली॰ छायाव्यवहारः

एतज्ज्ञानोदयोभवत्विति बुद्ध्याभिप्रायेणत
द्भेदासुगमान्विधायप्राज्ञैः प्रकीर्णादिकंव
हुधारचितमिति न तत्रयासोव्यर्थः प्रस्तुतप
रोपकारं तयामहाफलइत्यर्थः शार्दू॰ २॥
इतिश्रीली॰विलासे छायाव्यवहारः॥ = ॥ =

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ कुट्टकव्यवहारे कुट्टको नाम घातकोप
गुणक इति यावत् तस्य व्यवहारो भाज्यभाज
कक्षेपकोद्देशादानयनं तदर्थं सूत्रं भाज्य इति
भाज्यो हारो भाजकः क्षेपकः क्षिप्यते धनमृ
णं वा क्रियते योंकः स क्षेपः ते च कुट्टकार्थमा
दौ प्रथमं केनाप्यंकेनापवर्त्यास्ततः कार्याः प
रं तु संभवे सति यदि भाज्यहरक्षेपकाणां त्रया
णां मध्ये केनैवांकेनापवर्तनं संभवति तदैवं विधिः
कार्यो नान्यथेति भावः ॥ अत एव त्रुट्योद्दिष्टं ल।

अथ कुट्टकव्यवहारे करणसूत्रं भा
ज्यो हारः क्षेपकश्चापवर्त्याः केना
प्यादौ संभवे कुट्टकार्थं ॥ येन छिन्नौ
भाज्यहारौ न तेन क्षेपश्चैतद्दुष्टमुद्दि
ष्टमेव ॥ १ ॥

ज्ञयति येनेति येनांकेन भाज्यहारौ छिन्नावपव
र्तितौ तेनांकेन क्षेपश्चेदपवर्तितुं न शक्येत त
दैतदुद्दिष्टमुद्दिष्टं ज्ञेयं तेन कुट्टककरणेपि न
तेन गुणितस्योद्दिष्टक्षेपयुतो नस्य भाजकभ
क्तस्य निःशेषता भविष्यतीत्यर्थः अत्र क्षेपइ
त्युक्तेः केनापि भाज्यक्षेपयो र्भाजकक्षेपयोर्वा

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पवर्तनेसतिक्रमेण भाज्यस्य भाजकस्य।
चापवर्तनासंभवेपिन दृढत्वोद्दिष्टेतिगम्यते।
एवंचाग्निमसूत्रेस्पष्टो भविष्यति शालिनी।
प्रकृतेपवर्तनविधिमाह परस्परमिति।
द्वयोराश्योः परस्परं भाजितयोर्यः शेषः स
तयोरपवर्तनं स्यात् तेनतयोर्निःशेषता॥

परस्परंभाजितयोर्द्वयोर्यःशेषस्त
योस्यादपवर्तनंसः स्वेनापवर्तेन
विभाजितौयौतौभाज्यहारौदृढसं
ज्ञकौस्तः॥२॥

आयतेइत्यर्थः अयमर्थः भाजकेनभाज्येभ
क्तेयच्छिष्यतेतेनभाजकोभजनीयस्त
च्छेषस्तयोरपवर्तनंस्यात् एवमपवर्तनां
कमुक्त्वातदपवर्तितभाज्यभाजकयोर्नामसं
केतमाह॥ स्वेनेतितेनापवर्तनांकेनयौभा
ज्यहारौविभाजितौतौदृढसंज्ञकौभवतः
पुनस्तयोर्वृद्धिदशयाभावादन्वर्थीसंज्ञा॥
उपजातिः॥२॥ अथकुट्टकरीतिमाह।
मिथइति तौदृढभाज्यहारौमिथोन्योन्यंभजे

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

त् हारेण भाज्यो भाज्यस्तच्छेषेण हारो भा
ज्य छेदेषेण भाज्यस्तच्छेषेण हार इत्येवं याव
द्भाज्ये रूपमेकः शिष्यते तावन्मिथो भजेत्फ
लानि च फलं फलेवा फलानि यथासंभवं क्र
मशो वल्ली रूपेण धो धो निवेश्य तदधोपव
र्तितः क्षेपो योज्यस्तदं त्ये खं शून्यं योज्यं तत
उपांतिमेनांत्यस्योपरिष्ठ तया समीपगेन

मिथो भजेत्तौ दृढ भाज्य हारौ यावद्विभा
ज्ये भवतीह रूपं फलान्यधोधस्तदधो
निवेश्यः क्षेपस्ततः शून्यमुपांतिमेन
॥३॥ स्वोर्ध्वे हतें त्येन युतें तदंत्यं त्यजेन्मु
हुः स्यादिति राशियुग्मं ऊर्ध्वो विभा
ज्येन दृढेन तष्टः फलं गुणः स्यादद
धरो हरेण ॥४॥

स्वोर्ध्वे स्वमूर्ध्वगेंके हते गुणिते नरं त्येन युते
मिश्रिते सति तदंत्यं त्यजेत् एवं मुहुर्वारंवा
रं कार्यं पुनरुपांतिमेव स्वोर्ध्वे हतें त्येन युतें
त्यं त्यजेत्पुनरप्येवमिति करणे राशियुग्मं सं
पद्यते तयो राश्यो रूर्ध्वो राशि दृढेण विभाज्येन

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तष्टः शेषितः फलं लब्धिसंज्ञः स्यात् अधरो
धस्यश्च राशिर्दृढेण हरेणतष्टः सन्गुणः स्या
त्तेनैवगुणकेनोद्दिष्टभाज्यो गुणितः क्षेपोन
युतो हारभक्त ऊर्ध्वराशिरूपां लब्धिं वितरति
स्वयं च नि:शेषतामापद्यते स्थलांतरे सक्षे
पांतरमाह एवमिति यदा तद्दृढभाज्यहारयो
र्मिथो भागेन जाता लब्धयः समा द्विचतुःषट्

एवं तदैवात्र यदा समास्ताः स्युर्लब्ध
यश्चेद्विषमास्तदानीं यथागतौ लब्धि
गुणौ विशोध्यौ स्वतक्षणाच्छेषमितौ
तु तौ स्तः ॥५॥ एकविंशतियुतं शतद्व
यं यद्गुणं गणक पंचषष्ठियुक् पंचव
र्जितशतद्वयोद्धृतं शुद्धिमेति गणकं
वदाशु तत् ॥६॥

प्रभृतिः रूपाः स्युस्तदैवमेतावतैव संस्कारेण
तत्र कुट्टक सिद्धिर्न तत्र संस्कारांतरापेक्षेति
भावः चेद्यदि ता लब्धयो विषमाः स्युस्तदानीं
यथागतौ लब्धिगुणौ न ग्राह्यौ किंतु स्वतक्ष
णाद्विशोध्यावूननीयौ लब्धिर्दृढभाज्या
द्गुणश्च दृढहाराद्विभाज्यः शेषमितौ तौ ल

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ध्धिगुणौ भवतः ॥५॥ उपजातयः ॥ उदाहरति एकविंशतीति एकविंशत्युत्तरशतद्वयं केन गुणितं पंचषष्ठ्या सहितं पंचनवत्युत्तरशतेन भक्तं निःशेषतामेति हे गणक गुणकं तं गुणमाशु वद रघोद्धता ॥६॥ तन्न्यासं दर्शयति न्यास इति अपवर्तनांकं दर्शयति अत्रेति भाज्ये २२१ हारेण १९५ भक्ते १ शिष्टं २६।

न्यासः भा २२१ हा १९५ क्षे ६५ अत्र परस्परं भाजितयोः शेषः १३ अनेन भाज्यहारक्षेपा अपवर्तिता जाताः भा १७ हा १५ क्षे ५ अनयोर्दृढभाज्यहारयोः परस्परभक्तयोर्लब्धिरधोधस्तदधः क्षेपः शून्यं च निवेश्य जाता वल्ली ३ ॥

तेन हारे १९५ भक्ते ७ शिष्टं १३ अयमपवर्तनांकः अपवर्तितानां नाहानेनेति अनेन १३। भाज्यो २२१ पवर्तितो जातो दृढभाज्यः १७। तथा हारो १९५ पवर्तितो जातो दृढहारः १५। क्षेपश्चापवर्तितः ५ भाज्य १७ क्षे ५ हार १५॥ अथ फलवल्लीमभिनीय दर्शयति अनयोरिति दृढहारेण १५ दृढभाज्ये १७ भक्ते लब्धं रूपं १ तस्य शेषेण २ हरो १५ भक्ते लब्धं ७

पूर्वलब्धाधो न्यस्तं ३ शेषं १ भाज्यस्य
शेषता जाता पंक्त्यां च फलयोरधस्तात्क्षे
पः स्थापितः ३ तदधः खं न्यस्तं जाता
पंक्तिः ३ अथ राशिद्वितयं प्रदर्शयति॥
उपांतिमेनेति अत्र वल्ल्यामंत्यं शून्यमुपां
त्यं च ५ तेन स्वोर्ध्वे ७ गुणितेंत्यं च० युतं ३५
त्यं च त्यक्तं जाता वल्ली ३५ ५ पुनरुपांत्येन
३५ स्वोर्ध्वे १ हतेंत्येन ५ युतं ४० ऽन्त्यं च त्य
क्तं जातं राशिद्वयं ४० ३५ अथ लब्धिगुण
वाह॥ एताविति एतौ राशी क्रमेण दृ
ढ भाज्यहाराभ्यां तष्टौ अत्राद्यो राशिः ४०
दृढभाज्य १७ तष्टो ६ लब्धिसंज्ञः तथा
धरो राशि ३५ दृढहारेण १५ शेषितः
५ गुणसंज्ञः अनेनैव गुणकेन गुणितमु
द्दिष्टं भाज्यं क्षेपयुतं हारहृतं तां लब्धिं वि
नीर्यन्तिः शेषतामुपयाति तथाहि भा
ज्यं॥२२१॥ पंच गुणे ११०५ क्षेप ६५ युतं
११७० हार १९५ हृते लब्धं ६ शेषं० यद्वा
भाज्यं दृढं १७ पंच गुण ८५ क्षेप ५ युतं
९० हार १५ भक्ते लब्धं ६ शेषं० ॥ एवं स
र्वत्राग्निमोदाहरणे प्रत्ययो विधेयः ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वमानीतगुणलब्धेर्गानानविधिमग्रेव
क्ष्यति इष्टाहतस्वस्वहरेण युक्तेनवाभवे
तां वृ हृधा गुणघ्नी इति॥ अस्यायमर्थः।
इष्टेन स्वकल्पितेनैकद्वित्र्यादिना आह
तो गुणितो यः स्वः स्वः स्वीयः स्वीयो हरस्त
त्कोलब्धे दृढभाज्योगुणस्य च दृढहार
उपांतिमेनस्वोर्द्धे हृतइत्यादिकरणे
नजातंराशिद्वयं ३५ एतौ दृढभाज्य
हाराभ्यां १७।१५ तष्टौ लब्धिगुणौ।
जातौ ६।५ एतयोः स्वतक्षणाभिघ्न
गुणं हेपइत्यथवा लब्धिगुणौ २३।
२०।वा ४०।३५ इत्यादि॥
स्वेन तेन युक्ते भिन्निते ते प्रागानीते गुण
घ्नी गुणलब्धी वस्वधा भवेतां इष्टगुणितदृ
ढभाज्ययुतालब्धिरिष्टगुणितदृढहार
युतो गुणश्चेव स्याता मानाना नमेत्यर्थः
अस्य सूत्रस्याप्यत्रैवोदाहरणे लाघवाय
व्याप्तिं दर्शयति अनयोरिति यथेष्टं। त
त्कुणितदृढभाज्यो १७ युता लब्धि ६जा

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ली·वि· ता २३ इष्ट १ गुणित दृढहार १५ युतो गुणो
१७६ ५ जात: २· आभ्यामपि २३।२· लब्धि गुणाभ्यां
प्रत्यय: प्राग्वत् एवमिष्टे १ तेन भाज्ये १७ हा
रौ १५ गुणितौ ३४।३· ताभ्यां लब्धि गुणौ ८·५
युतौ ४·।३५ जातावन्यौ लब्धि गुणौ एवं त्रि
केइष्टे ५१।७।५· एवं दशकेइष्टे १७८।१५५
एवमिष्टभेदेन भेदो बहव:॥ अपवर्त्याणां
मध्याद्द्वयोरपवर्तनेपि कुट्टकविधिमाह भ

करणसूत्रं भवति कुट्टविधेर्युतिभाज्य
यो: समपवर्तितयोरपिवागुण: भ
वति योयुतिभाजकयो: पुन: सच भवे
दपवर्तन संगुण: ७ उदाहरणं शतं
हृतं येन युतं नवत्या विवर्जितं वापहृ
तं त्रिषष्ट्या निरग्रकं स्याद्वद मे गुणं
तं स्पष्टं पटीयान्यदि कुट्टकेसि॥८॥

वतीति॥ युति: क्षेप: युति भाज्ययो: समपव
र्तितयोरपिकुट्टविधेर्वा गुणो भवति युति
भाजकयोरपवर्तितयोरपि कुट्टविधे गुणो
भवति परं तु सप्रत्ययागतो न ग्राह्य: किंतु स
च पुनरपवर्तित संगुणो युति भाजकौ येना

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पवर्तितो तेन गुणितो भवेत् अत्रागतगुणस्या
पवर्तनांकगुणनाभिधानात्तल्लब्धे यथागता
याएव ग्राह्यताप्रतीयते तुल्यन्यायेन च पूर्वी
र्द्धोक्तयुजिभाज्यापवर्तनकृतकुट्टकविधा
नीतगुणस्य संस्कारांतरानभिधाना यथाग
तस्यैव तस्य ग्राह्यतायां सिद्धायां तत्रागतलब्धे
श्च संस्कारांतरापेक्षानुमीयते तथा च युति
भाज्यापवर्तनस्थले गुणो यथागत एव ल
ब्धिस्तु पवर्तनसंगुणा ग्राह्या युतिभाज्यका
पवर्तनस्थले तु गुणो पवर्तनसंगुणो ग्राह्यो
लब्धिस्तु यथागतैवेति सिद्धं उक्तविलंबि
तमाहनभोभरौ ७ उदाहरणं शतमिति ये
न गुणकेन हतं गुणितं शतं नवत्या युतं अथ
मसूत्रो द्विशार्धमाह विवर्जितं च त्रिषष्ट्या
पहृतं भक्तं निरग्रकं निःशेषं स्यात् तं गुणमे
स्य षष्ठवद हे गणक यदि ते कुट्टके पटीयान
तिशयेन पटुरसि कुट्टकविधानानि पाटी
वमंतरानैतान्निरूपयितुं सुशक्यमिति भावः

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ली॰वि॰
१००

प्रथममपवर्तनं विनैव गुणकमानयति स्मा
सइति अत्र भाज्यः १०० हारः ६३ क्षेपः १०
त्रयाणामेषामेकेनकेनाप्यपवर्तनं संभव
तीति केनाप्यपवर्तनं न कृतं किंतु यथास्थि
तावेव भाज्यहारौ दृष्ट्वा तथा कल्पितौ मिथो
भाज्ये यथा हारेण ६३ भाज्ये १०० भक्ते लब्धं
१ शेषेण ३७ हारे ६३ भक्ते लब्धं १ शेषे १

न्यासः भा १०० हा ६३ क्षे १० जातौ पूर्व
वल्ल्यधि गुणौ ३०।१८ अथवा भाज्य
क्षेपौ दशभिरपवर्त्य परस्परं भज
नाल्लब्धफलानि क्षेपं खं चाधोधोनि
वेश्य जाता वल्ली पूर्ववल्ल्यो
गुणः ४५ लब्धि र्न्यासोऽत्र
लब्धयो विषमा [illegible] नो गुणो ४५
स्वतक्षणा ६३ द्विशोधिते जातो गुणः
सर्वत्र १८ गुणघ्न भाज्ये क्षेपयुते हरभ
क्ते लब्धिः ॥३०॥

शेषेण २६ भाज्यशेषे ३७ भक्ते लब्धं १ शेषे
ण ११ हारशेषे २६ भक्ते लब्धं २ शेषेण ४

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भाज्यशेषे ११ भक्ते लब्धं २ शेषेण ३ हारे शे
षे ४ भक्ते लब्धं १ शिष्टं १ जातं भाज्ये रूपशे
षमिति भागसमाप्तिः जाता लब्धिपंक्तिः १।
१।१।२।२।१। अस्या मधो धो न्यासे तदधः क्षे
पस्य ९० शून्यस्य ० च न्यासे सति जाता व

१
१
२
२
१
९०
०

ल्ली अत्रोपान्त्येन ९० स्वोर्ध्वे १ हतेऽन्त्येन
युते ऽन्त्येन च ० युक्ते जातं ९०/१ पुनरेवं कृते
जा तं २७०/९० पुनः ६३०/२७० । पुनः ९००/६३०
पुनः १५३०/९०० पुनः २४३०/१५३० जाते राशिद्वयं
तयोरूर्ध्वो राशि २४३० दृढभाज्येन १०० तष्टः
३० लब्धिरियं तथाधरो राशिः १५३० दृढ
हारेण ६३ शेषितो १८ जातो गुणकः अ
नेन गुणिते शते १८०० नवत्या युते १८९०
त्रिषष्ट्या हृतं लब्धं ३० शिष्टं ० इति प्रस्त
पः ॥१०॥ अथापवर्तितयुतिभाज्याभ्यां कु
ट्टकविधिं दर्शयन्नपवर्तेति अत्र भाज्यो १००
क्षेपौ ९० दशभिरपवर्तितौ १० ९ भाजक

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

स्तु यथास्थितस्य ६३ भाज्यहारैा मिथो भक्तौ य
था भाज्ये १० हरेण ६३ भक्ते लब्धं शेषेण १० हा
रे ६३ भक्ते लब्धं ६ शेषेण ३ भाज्ये १० भक्ते लब्धं
३ शेषं १ जातं भाज्ये रूपशेषत्वे लब्धी ०।६।३
क्षेपं ९ स्वं चाधोधो विन्यस्य जाता वल्ली ३ | ६ | ३ | ९ | ०
उपान्त्येन स्वोर्द्ध हते इत्यादिकरणेन जातं
२७ पुनः १८९ जातमिदं राशिद्वयं अत्रो
र्द्ध राशिः २७ दृढ भाज्येन १० तष्टः ७ लब्धी
नां ०।६।३ त्रिकत्वाद्वैषम्यात्स्वतक्षणाद् दृ
ढभाज्य वा हारक्षेपौ नवभिरपवर्तितौ
भा १० हा ७ क्षे १ अत्र लब्धिक्षेपा
णां वल्ली १ | ६ | ३ | ० (?)

? भाज्यादेव शोधितः ३ जाता लब्धपरमियं
गणितेन संवादमेतीति स्पष्टत्वेत्यभिप्रेत्योक्त
मत्र लब्धिर्नग्राह्येति भाज्यहारापवर्तनांक
संगुणितानुसंवादमेतीति तत्संस्कारमपेक्ष
ते यथा लब्धि ३ र पवर्तनांक १० गुणिताजा

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

नालब्धिः ३ एवमधरो राशिः १७१ दृढहा
रेण तष्टः ६३ जातो ४५ गुणलब्धि वैषम्या
त्स्वतक्षणा ६३। शुद्धः १८ जातौ स एव गु
णः एतस्य सप्राग्वेवादर्शि अथ गुणः प्रा
ग्वत्तेलब्धिर्भाज्यात द्दत्त युतो हृतादिति व
क्ष्यमाणसूत्रमप्यत्रैवोदाजिहीर्षुरिमामे
वं लब्धिं प्रकारान्तरेणानयति गुणघ्नेति य
था गुणघ्नं १८ गुणितं भाज्यं १०० जातं १८००
क्षेपं २ युतं १८०२ हारहृतं ६३ लब्धिः ३
अथ युजि भाज्यकयोरेवापवर्तनेनापि कुट्ट
करोति दर्शयतस्यैवेति हारं ६३ क्षेपौ २
नवभिरपवर्तितौ ७।१ जातो दृढ हारक्षे
पौ भाज्यस्तु १०० यथावस्थित एव भाज्यं १
भाजकौ ७ मिथो हृतौ १४।३ लब्धिः क्षेपं
१ खं ० चाधो विन्यस्य कृतावल्ली १४ ३ १ ० तत
उपान्त्येन स्वोर्द्धे हते त्येन युते तदं त्य
वसक्ते जातं ३ उपनः ४३ राशिद्वयं क्त
द्धौराशिः ४३ स्वभाज्येन १०० तष्टः ३ जा

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ताल्लब्धि : अधोराशि: ३ - स्वहरेण ७ तष्ट:
२ जातोयं गुण: परंत्वसंवादान्न ग्राह्योपितु
प्रतिभाज्यकापवर्तनांक ९ गुणित: १८ ग्राह्य:
एवं पृथक्पृथक प्रतिभाज्ययो र्प्रतिभाजक
योश्चापवर्तनपक्षोयं दर्श्यतयो: संकरेणा
पि पक्षांतरं प्रदर्शयेत्तथैवेतिभाज्य: ९० क्षे
पौ ९ - प्रथमं दशभिरपवर्तितौ जातौ दृ
ल ब्धो गुण: २ क्षेप हारापवर्तन २ गुणि
तो जातो स एव १८ अथवा भाज्यक्षेपौ
प्रथमं हारक्षेपौ चापवर्तितौ जातौ भा ९
हा ७ क्षे १ अत पूर्ववज्जाता वल्ली १ १ गु
णश्च २ हारक्षेपापवर्तनेन २ गुणि
तो जातो स एव १८ गुणाभजनाभ्यां
लब्धिश्च ३ - गुणलब्धी: स्वहारक्षे
पाविस्तथा गुणलब्धी ८१।१२ वा
१४४।२३ - इत्यादि॥ =
ढ भाज्यक्षेपौ १०।१९ भाजकश्च ६३ पुनर्भा
जकक्षेपौ ६३।९ नवभिरपवर्तितौ जातौ
दृढौ तौ ७।१ तोपिच भाज्य: १०।हार: ७

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

क्षेपः १ इतिसिद्धं पुनर्भाज्यहारौ ९ मिथोभक्तौ
लब्धी ॥ २ क्षेपं १ खं ० चनिवेश्यकृतावल्ली
१ ३ पांत्येन स्वोर्द्ध्वे हते इत्यादिकरणे जातं २ पु
१ नः ३ जातौ राशी रनयोरूनता स्वतक्षणा
भ्यां ९ २ तात्तक्षणं न संभवतीति यथावस्थिता
वेव लब्धिगुणौ परंतु संस्कारांतरमपवर्तन
संकराद्भावव्यपेक्षेनेयथा द्विराशि ३ पु
ति भाज्यापवर्तनांकः १ - गुणिता जाता सैव
लब्धिः ३ - तथाधरो राशिर्युतिभाजकापव
र्तनांकः ९ गुणो जाताः सएव १८ गुणः रनयो
र्गुणलब्धी वक्ष्यमाणसूत्रोदाहरणसिद्धयेना
नातैं दर्शयति गुणलब्ध्योरिति रूपेइष्टेगु
णलब्धी : १८ । ३ - स्वहारौ ६३ । १ - - क्षिप्ते जाते
अन्यादृशी गुणलब्धी ८१ । १३ - द्विके इष्टे द्वि
गुणस्वहारक्षेपे जाते गुणलब्धी १४४ । २३ -
एवं त्रिके इष्टे २०७ । ३३ - चतुष्के इष्टे २७० ।
४३ - एवमन्यदप्यूसंप्रत्ययस्तु प्राग्वत ॥ ० ॥
नवसा । विवर्जितं चेति यदुक्तं तत्तदर्थं सूत्रां
तरमाह क्षेपजे इति क्षेपजे क्षेपस्य धनरूप

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ली॰वि॰
१८॰

तयोर्जाते ये गुणाप्ती गुणलब्धी ते तक्षणा स्वी
याद्धार भाज्यरूपया तक्षणात्क्षुद्रे ऊनिते वि
शुद्धजे क्षेपस्यकृतायां जाते गुणाप्ती स्तः प्रा
क्तनोदाहरणे एवं तद्दृष्टयति अत्रेति नवति
योजनपक्षे प्रागानीतौ लब्धिगुणौ ३०।१८ स्व
भाज्यहाराभ्यां १००।६३ शुद्धौ नवति वियोज
नेपक्षीयौ तौ जातौ ७०।४५ पुनो भाज्ये १००गु
करणसूत्रं क्षेपणे तक्षणाक्षुद्रे गुणाप्ती स्तो
विद्धि जे अत्र पूर्वोदाहरणे नवति क्षेपे यौ
लब्धिगुणौ जातौ ३०।१८ एतौ स्व तक्षणा भ्या
माभ्यां १००।६३ शोधितौ ये शेष के तन्मितौ
लब्धिगुणौ नवति शोधिते ज्ञातव्यौ ७०।४५
एतयोरपि स्वस्वतक्षणे क्षेपइत्यथवा १७०।
१०८ वा २७०।१७१ द्वितीयोदाहरणं यद्गु
णा गणक षष्टिरन्विता वर्जिता च दशभिः
षडुत्तरैः स्यात्त्रयोदशहृता निरग्रका तं
गुणं गणक मे पृथक् पृथक्॥८॥

एकेन ४५ गुणिते ४५०० नवत्या ९० विवर्जिते ४४१०
हारेण [illegible] हृते ७० लब्धिः शिष्टं ० ॥ इति प्रत्य
यः अनयोरपि ७०।४५ रूपे षष्ठगुणे स्वस्वतक्ष

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

65

ण १००।६३ अत्र क्षेपे जाती लब्धि गुणौ २०।१७१
रावमन्यादृश्याव प्रुव्हौ लब्धि वैबम्येउदार
हरणांतरमाह यद्गुणेति हेगणकषष्टि ६०
ये गुणायेन गुणिता षड्भिः षडधिकै दशभिः
षोडशभिरन्विता वर्जिता च त्रयोदशभिर्भक्ता
निरग्रकास्यात्तं गुणं गणक मे पृथक् २ नाना वि
धं कथय रघोद्धता ॥९॥ न्यासमाह न्यासइ
ति अत्रोदाहरणे भाज्ये ६० भाजकं १३ क्षेप
कः १६ भाज्यक्षेपयोश्चतुर्भिरपवर्तनसंभवा

न्यासः भा ६० हा १३ क्षे १६ प्राग्वज्जा
ते गुणाप्ती २।८ अत्रापि लब्धयोवि
षमात्रतरा गुणाप्ती स्वतक्षणाभ्यां
१३।६० विशोधिते फलं ॥०॥

दृष्टोद्दिष्टता भाज्यभाजकयोस्त्वेकेनकेना
प्यपवर्तनासंभवाद्यथास्थितावेव दृढ भा
ज्यभाजकौ $\frac{६०}{१३}$ अनयोर्मिथो भागे ४।१।१।
२।१।१। लब्धीः क्षेपं १६ खं ० चाधोधो विन्यस्य
जनिता वल्ली ४ १ १ २ १ १ १६ ० ततः स्वोर्द्धे उपांत्येन हत
इत्यादिकरणे $\frac{१६}{१६}$ पुनः $\frac{३२}{१६}$ पुनः $\frac{४८}{३२}$

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पुनः ६/४८ पुनः ३६८ जातेराशिद्वयमिदं १
३६८।८॰ अत्रोर्द्ध्व राशि ३६८ भाज्य ६॰ तष्टः
लब्धं ६ शिष्टं ८ जातालब्धिः अधरो ८॰ रा
शि भाजिक १३ तष्टः लब्ध ६ शिष्टं २ जातौ यंगु
णकः ३ सौ च लब्धिगुणौ ८।२ लब्धीनोयं
चकतयावैषम्यात्स्वतक्षणाभ्यां ६॰।१३ शो
धितौ ५२।११ स्पष्टौ जातौ क्षेपधनपक्षेलब्धि
गुणौ यथा भाज्ये ६॰ गुणक ११ गुणिते ६६ क्षे
प॥६ युते ६७६ भाजक १३ भक्ते लब्धं ५२ शि
ष्टं॰ क्षेपस्य ऋणपक्षे त्विमौ लब्धिगुणौ ५२।
११ स्वस्वतक्षणा ६॰।१३ च्छोधितौ ८।२ जातौ
फलगुणौ यथा भाज्ये ६॰ गुणक २ गुणो १२
क्षेप॥६ रहिते १॰४ भाजक १३ भक्ते लब्धं ८
शिष्टं॰ इति प्रत्ययः॥ अथ भाज्ये विशेषमा
ह गुणलब्ध्योरिति ऊर्ध्वाधोराश्योर्दृढ
भाज्यहाराभ्यां तक्षणसमये फलं तक्षणभाज
न्यलब्धिरूपं समं तुल्यमेव ग्राह्यं नन्यूना
धिकमित्यर्थः॥ अथ भाज्यहाराभ्यां
क्षेपस्याधिक्ये प्रकारांतरमाह हारतष्ट॰

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

इति धने योजनीये क्षेपे हारतष्टे भाजकशो
धिते सति गुणलब्धी पूर्ववदेव साध्ये परंतु
लब्धौ वल्लमानसंस्कारान्तरं विशेषस्तयोरु
त्पन्नयोर्गुणलब्ध्योर्मध्ये क्षेपस्य धनपक्षे सा
लब्धिः क्षेपतक्षणलाभाढ्या क्षेपस्य हारेण
तक्षणादागतो यो लाभः फलं तेनाढ्या युक्ता

हारतष्टे धनक्षेपे गुणलब्धी तु पूर्वव
त् क्षेपतक्षणलाभाढ्या लब्धिः शुद्धौ
तु वर्जिता १ उदाहरणं येन संगुणि
ताः पंच त्रयोविंशतिसंयुताः वर्जिता
वा त्रिभिर्भक्ता निरग्राः स्युः स को गु
णः ॥ भा ५ हा ३ क्षे २३ अत्र वल्ली १ १ २३
पूर्ववज्जातं राशिद्वयं ४६ २३ एतौ भाज्य
हाराभ्यां तष्टौ वा त्राधो राशौ त्रिभिः तष्टे
सप्तलब्धं ते ऊर्ध्वराशौ पंचभिस्तक्षणेन
व लब्धं ते ते न ग्राह्याः गुणलब्ध्योः स
मं ग्राह्यं धीमता तक्षणे फलमित्यतः
सप्तैव ग्राह्याः एवं जाते गुणाप्ती २ । ११ ॥

ग्राह्यो गुणस्तु यथागत एव शुद्धौ क्षेपस्य ऋण
पक्षे तु सा लब्धिः क्षेपतक्षणलाभेन वर्जिता ग्रा
ह्येत्यर्थः तत्रोदाहरणमाह येनेति स्पष्टार्थः

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अत्रभाज्यः ५ हारः ३ क्षेपः २३ अत्रयाग्णा
केनापिसमेनो पवर्त्तनासंभवाद्यथास्थि
तावेवभाज्यहारौदृढौ ५/३ अनयोर्मिथो
भागपरम्परायांलब्धी १।१ क्षेपं २३ खं०
चाधोधोनिवेश्यकृतावल्ली १ १ २३ ० उपांत्येनत्
तेस्वोर्द्ध्वे १ त्यादिकरणेजाते ४६ २३ २३ पुनः
४६ जातमिदंराशिद्वयं अत्रगुणलब्ध्योः
२३ संग्राह्यंधीमतातक्षणफलमितिसूत्रस्य
व्याप्तिंप्रदर्शयति एतावितिस्पष्टार्थोयंग्रं
थः समफलग्रहणेगुणलब्धीदर्शयति ए
वमिति अनयो २।११ प्रत्ययोयथाभाज्ये ५
गुण २ हते १० क्षेप २३ युते ३३ हारहृते ३ ल
ब्धं ११ शेषं ३ इति ॥ एवंक्षेपस्यधनपक्षे
गुणलब्धीप्रदर्श्यति ऋणपक्षेतेदर्शयति क्षे
पजइति क्षेपजेगुणाप्ती २।११ स्वतक्षणा ३।
५ च्छुद्धे जाते ऋणपक्षीये गुणाप्ती १।६ अत्र
लब्धं काः ११ स्वतक्षणा ५ दधिकातयानशु
द्धिमेतीति तक्षणमेवलब्धिः तः ११ शोधि
तं जाताविलोमालब्धिः ६ एतदनुसारेण
प्रत्ययकाले योगवियोगवैलोम्यंभविष्य

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

नीतिर्वा द्रष्टव्यं यथा भाज्यो ५ गुणेन १ गुणि-
तः ५ क्षेपो २३ अस्मादधिकेन शुद्धनीतिर्वै-
लोम्येन क्षेपो २३ ऽत्राऽयं ५ पातितो १८ हा-
र ३ हृतो लब्धं ६ शेषं ० अत्रापीष्टगुणस्व-
स्वहार योगेन गुणलब्ध्योर्नानात्वं दर्शयति
इष्टाहतेति अत्र प्रकृतेर्गुणलब्धी १।६ अन-
योर्हारौ ३।५ द्विकेनेष्टेन गुणितौ ६।१० गुणे
१ द्विगुणस्वहार ६ युतो जातो गुणः ७ ल।

क्षेपजे तक्षणाच्छुद्धे इति शुद्धौ जाते।
१।६ इष्टाहतस्वस्वहरेण युक्ते इति द्वि-
गुणितौ स्वहारौ क्षेप्यौ यथा धनलब्धिः
स्यादिति जाते ७।४ एवं सर्वत्र [illegible]।
वा हरतष्टे धनक्षेप इति॥

ब्धिस्तु ६ विपरीतमुद्दिष्टत्वान्न द्विगुणितस्व-
हारेण योज्या किंतु प्रत्युत ततः शोध्येति जा-
ता लब्धिः ४ तथा च प्रत्ययः यथा भाज्यं ५
गुणा ७ गुणितं ३५ क्षेप २३ वर्जितं १२ हार।
भक्ते २ लब्धं ४ शेषं ० इति हारतष्टे धनक्षेप
इति सूत्रस्य व्याप्तिं प्रदिदर्श

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

यिष्टः प्रकारांतरेण न्यास भाहारयवेति अत्र
भा·५। हा ३ क्षे २३ क्षेपोयंहरेणतष्टो लब्धं
७ शिष्ट २ न्या सेन्यस्तं अथ भाज्य ५ भाज
कयो ३ र्मिथो भागेन जातं ।।। लब्धीक्षेपं च
२ खं ० चाधोधो विन्यस्य जाता वल्ली १ २ १ स्यो
र्द्धेउपांत्येन हतइत्यादि करणे जातं २ ३ पुनः
१ २ जातं राशि द्वयं एतौ राशी १ २ दृढ भाज्य
हाराभ्यां ५। ३ तक्षयितुं नशक्येते इतियथा
न्यासः भा ५ हारा ३ क्षे २३ पूर्ववज्जा
ते गुणाप्ती २। ४ एवं स्वहाराभ्यां विशो
धिते शुद्धि ते जाते ।।। क्षेप तक्षण
लाभाढ्या लब्धिः रिति जाते क्षेपजे
२।।। शुद्धौ तु वर्जिते ति १। ६।।

स्थितावेवजातौ क्षेपधन पक्षेलब्धि गुणौ
४। २ अनयो र्गुण स्तु यथागत एव ग्राह्यः।।
लब्धिस्तु क्षेप तक्षण लाभाढ्या ग्राह्या क्षेपस्य
२३ हारेण ३ तक्षणे कृते सति यल्लब्धं ७ तेन
नाढ्या लब्धि ४ र्जाता ११ स्पष्टा तथा च भा
ज्ये ५ गुण २ गुणिते १० क्षेप २३ युतं ३३ हा

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

71

रहते जाता लब्धिः ११ ऋणक्षेपे गुण लब्धी द
र्शयति शुद्धौ इति प्रथमं धनक्षेपे गुणः २ ।
ब्धी ४ क्षेप जे तद्वगुण क्षेपे गुण ब्धी स्तो विशु
द्धजे इति वचनात्स्वहरात् ३।५ शोधनीये ।
जाते ऋणक्षेपे गुणाप्ती ११ पुनरत्र क्षेपस्य
हारतष्टतया संस्कार विशेषो लब्ध्या कार्यः
तथाहि गुणस्तु यथागत एव २ लब्धिस्तु क्षेप
तक्षणलाभेनोननीया सा च ततो न्यूनत्वात् तेनो
नयितुं न शक्यते इति स्वयमेव ततो वैलोम्येना
पनेति जाता लब्धिः ६ तथा च भाज्ये ५ गुणः
२ गुणिते ५ क्षेपेनोनं नीये ततोल्पत्वात् द्विष्ट ।
रीत शुद्धिजलब्धि कृत्वा स्वक्षेपं पेद्धा २३ त्या
तिते १८ हार ३ भक्ते ६ जाता लब्धिः ॥

अत्रापीष्टहतस्वस्वहरक्षेपेण गुणलब्धि दर्श
यति धनेति अत्र गुणो १ द्विक गुणितस्व हारे
ण ६ युतो जातो गुणः ७ लब्धिः ६ द्विगुण ।
तस्वहारेण १० योज्यापि वैलोम्यात् ततः पातिता
जाता लब्धिः ४ तथाहि भाज्ये ५ गुण ७ हते ३५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

लीं॰वि॰
१८४

क्षेपोने १२ हार ३ हृते लब्धिः ४ सर्वमूक्ष्व
र्षक्षेपाभावे विशेषमाह क्षेपाभाव इति य
त्र क्षेपाभावः स्यात्तत्र गुणः शून्यं ज्ञेयं ल
ब्धिर प्यर्धाच्छून्यमेव यत्र च क्षेपो हारे
२३ हृतो हार भक्तः शुद्धेत्तिशेषो भवे तत्रापि
गुणः शून्यमेव हारोद्धृतात्क्षेपस्तु फलं ज्ञेयं
अनुष्टुप् १२ तस्योदाहरणमाह येनेति येन
धनूलब्ध्यर्थं द्विगुणो रवहारे क्षेपे क्षिप्ते
जाते ७।४ करणसूत्रं क्षेपाभावे तथा
यत्र क्षेपः शुद्धो हरोद्धृतः क्षेपः शू
न्यगुणस्तत्र क्षेपो हारहृतः फलं उ
दाहरणं येन पंचगुणिता रवसंयुताः
पंचषष्टि सहितान्न ते थवा स्युस्त्रयो
दशं हृता निरग्रकास्तं गुणं गणक की
र्तयाशु मे १२ न्यासः भा५ हार १३ क्षे॰
क्षेपाप्ती ०।०॥
गुणकेन गुणिताः पंच भाज्याः रवसंयुतास्त्र
योदश हृता निरग्रका निरवशेषाः स्युस्तं गु
णं हे गणका शु कीर्तय॥ अथवा ते पंच येन गु

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

णिता पंचषष्टिः ६५ क्षेप पुनास्त्रयोदश भक्ता
निरग्रकास्तु: तं च गुणं कीर्तय कथय रघो
हृता १३ तत्र क्षेपाभावे गुणाप्ती दर्शयति भा
ज्य इति भाज्य ५ हार १३ क्षे० क्षेपाभावे गु
णाप्ती अपि शून्यमेव भाज्य ५ भाजक १३ यो
र्मिथो भागो न लब्धी: ०।२।१।१। क्षेपं० स्व-
धाधो धो विन्यस्य जाता वल्ली २ अत्रोपां
त्यस्य शून्यत्वात् तद्गुणितस्यापि च १ शून्यत्व
जातं राशिद्वयं ० इमे एव गुणलब्धि ॥
अथवा १३।५ वा २६।१० अयास: भा ५ हा
१३ क्षेपा ६५ क्षेपास्त्रयोदशोद्धृतः क्षे।
प: शून्यं गुणस्तत्र क्षेपो हार हृतः फल
मिति जाते गुणाप्ती ०।५। वा १३।५ वा २६।१०
इत्याद्यत्र सर्वत्र कुट्टके गुणलब्ध्योरनेक
धादर्शनार्थं सूत्रम् ॥ इष्टाहतस्वस्वह
रेण युक्ते ते वा भवेतां बहुधा गुणाप्ती ॥
अस्य व्याप्तिः पूर्वमेव दर्शिता अथवा
इष्टाहत स्वस्वहरेण युक्ते इति वक्ष्यमाण सूत्रेण
क्षेपाभावेपि गुणाप्ती प्राह अथवेति तथारूप

इष्टे इमे गुणघ्नी ०।० रूपगुणित खखनष्टगुण
१३।५ युते जाते त एव गुणाविति इष्टं २६।८ पं
चषष्टि क्षेपे पदे गुणघ्नी प्रदर्शयितुं न्यासमाह
न्यास इति भा ५ हा १३ क्षे ६५ अयं क्षेप हार
हृतो निश्शेषो भवतीति गुणः शून्यं क्षेपे
६५ हरो १३ हृते फलं ५ लब्धिर्गोगी स्यादिति क्षे
पधन पक्षे जाते गुणघ्नी ०।५ इष्टगुणित ख
हारक्षेपे १३।-५ च जाते ते १३।८-।२६।१५।
३९।२०। इत्यादि अत्रापि प्रत्ययः प्राग्वद्य
था भाज्यो ५ गुण गुणिते क्षेपयुते ६५ हा
र १३ हृते लब्धं ५ अत्रापि ऋणक्षेपपक्षे गु
णघ्नी ०।५ खतष्टगुणाप्तौ १३।५ शुद्धे जाते
१३।० क्षेपजे तक्षणाच्छुद्धे गुणाप्ती स्तो विशु
द्धिजइत्युक्तेः तथा च भाज्ये ५ गुणेन १३ गु
णिते ६५ क्षेपोने ० हरेण १३ भक्ते लब्धं ०
अथ गुणाप्त्योरनेकतार्थं सूत्रमाह इष्टाह
तेति व्याख्यातार्थमिदं सूत्रं प्राक् अस्योदा
हरणापेक्षायामाह ६५ स्येति प्रत्युदाहर

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

हरणं गुणाप्त्योनीनाविधत्वं दर्शितमेवेत्यर्थः
अथवेति सूत्रमप्यत्र केचित् पठंति तस्यायम
र्थः क्षेपभाज्यौ भाजकेन तष्टाणीयौ ततो वल्ली
मुत्पाद्य प्राग्वत् गुणाप्ती ये लब्धिस्तु यथा॥
गतानग्राह्या किंतु भाज्याद्यतपुनोद्धृतात् हृतं
गुणेन गुणितं युतं क्षेपसमक्षिप्तं उद्धृतं हारभक्तं
यल्लब्धं तस्माल्लब्धमेतत्फलमित्यर्थः अस्याप्युदाह
रणं शतं हतं येन युतं नवत्यैति श्लोके भाज्यक्षे॥

अथ स्थिरकुट्टकः क्षेपेतु रूपे यदि वा
विशुद्धे स्यातां क्रमाद्ये गुणकारलब्धी
अभीप्सितक्षेपविशुद्धिनिघ्ने स्वहारतष्टे भ
वतस्तयोस्ते १५ प्रथमोदाहरणे दृ
ढ भाज्यहारयोः रूपक्षेपयोर्न्यासः भा
१० हा १५ क्षे १ अत्र गुणाप्ती ७।८ एते
त्रिषष्ठ्ये पंचकेन गुणिते स्वहारतष्टे
च जाते ५।६ अथवा क्षेपयुतो गुणाप्ती ८।
९ एते पंचगुणे स्वहारतष्टे च जाते १०।११
पापवर्तनपक्षे प्राग्दर्शितमेव अथ स्थिरकुट्ट
कमाह क्षेपेतिवेति पद्ध उत्राप्युद्देशे रूपे। क्षेपे

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

धने विशुद्धे ऋणे वा सति ये गुणकार लब्धी
क्रमात्स्यातां ते स्थिरे एव पुनरभीप्सित इष्टो
यः क्षेपो विशुद्धिर्वा द्विघ्न्यादिस्तेन निघ्नगुणि
ते स्वहाराभ्यां तष्टे ते गुणाप्ती तयोर्धनर्णयोर्भव
तः उपजातिः ५४ तत्रोदाहरणं प्रागुक्तमेव नि
वेशयति प्रथमेति एकविंशति युतं शतद्वय
मित्यत्र पंचषष्टिक्षेपमपहाय रूपक्षेपीकृतं
ततो भाज्यभाजकौ २२१।१९५ त्रयोदशापवर्त्ति
तौ १७।१५ अनयोर्मिथो भागाज्जाता वल्ली
१ जातं राशिद्वयं ८ स्वतक्षकाभ्यां १७।१५
७ तत्र पितु मनन्हतपा यथास्थितावेवल
ब्धिगुणौ जातौ भाज्ये १७ गुण ७ गुणिते ११९
क्षेप १ युते १२० हार १५ हृते लब्धं ८ शेषं
शून्यमिति प्रत्ययः इमे गुणाप्ती स्थिरकुट्ट
कारव्ये अनयोरेवाग्रे प्रपंचः यथाभीप्सित
क्षेपेण ५ गुणिते इमे ७।८ जाते ३५।४०
स्वहाराभ्यां १५।१७ तष्टे ५।६ जाते गुणाप्ती
धनपक्षगे ऋणपक्षे तु प्रागानीते गुणाप्ती
७।८ स्वतक्षण १५।१७ शुद्धे ८।१२ जाते विशु

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

द्धिजे गुणघ्नी नेपुनरभीप्सितक्षेप ५ गुणे ४-।
४५ स्वहार ९५।।७ तष्टे ११ जाते गुणघ्नी
अनयोः प्रत्ययः प्राग्वद्विधेयः रूपक्षेप।
स्थाने इष्टक्षेपं च विभ्यस्य वल्लीमुत्पाद्य राशि
द्वयेनापि गुणघ्नी समानीय प्रत्येतव्यं विस्त
रभियोपरम्यते अथ कुट्टकगणितस्य स्थ
लांतरे उपयोगमाह अस्येति तदेवोपपादय
ति कल्पेति सिद्धांते हि भगणगुणिता कुदिन।

अस्य ग्रहगणिते महानुपयोगः तदर्थं
किंचिदुच्यते कल्प्याथ शुद्धिर्विकलाव
शेषं षष्टिश्च भाज्यः कुदिनानि हारः
तज्जं फलं स्युर्विकला गुणस्तु लिप्ताग्र
मस्माच्च कलालवाद्यं १६ एवं तदूर्ध्वं च त
था धिमासावमाग्रकाभ्यां दिवसारं वी
द्ध्योः १८ ग्रहस्य विकलाशेषात् अहर्गण
योरानयनं तद्यथा तत्र षष्टिर्भाज्यः कुदि (२)
नानि हारः विकलाशेषं शुद्धिरिति विक
ल्प्यासाध्ये गुणघ्नी तत्र लब्धिप्रमिता विक
विभक्ताद हर्गणात् भगणा कुदिनाद्याद्देशास्ततः
षष्टिगुणाद्विकलालभ्यंते शेषं च विकलाशेष

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ली·वि· सज्ञं भवति अत्रताचार्यो प्रातिलोम्येन विका
१८७ लाशेषमारभ्याहर्गणोतमंकं कुट्टकविधि
नैव समानयति कुट्टके च भाज्यभाजकक्षेपा
अपेक्षिता इति तत्कल्पनां दर्शयति कल्या
घेति अहर्गणाद्विकलान्ते के गृहीतेशिष्टं वि
कलावशेषं कुट्टकार्थे शुद्धिर्ऋणक्षेपरूपा
कल्याषष्टिर्भाज्यः कुदिनानि भूदिवसा हा
रकल्पः एवं भाज्यहारक्षेपेषु सत्सु प्रागुक्तो
रीत्या भाज्यहारयोर्भाज्ये रूपावशेषान्तं [illegible]
घोघातेन फलानि क्षेपं खं चाधोधो विन्यस्य
वल्लीं वितत्य राशिद्वयं समुत्पाद्य स्वदृढहार
भाज्याभ्यां सतक्षेपस्यर्णतया स्वस्वतक्ष
णाद्विशोध्य गुणाप्तीलब्ध्या तज्ञं फलं विक
लाः स्युरिति लब्धिमिता विकलास्तेयाः गु
णस्तु लिप्ताग्रं कलाशेषो मन्तव्यः अस्माच्च क
लालवाद्यं कलांशराशियोर्ग्राह्याः एवं तदू
र्ध्वं च भगणाहर्गणाचानेयौ अयमर्थः सएव
कलाशेषोऽग्रिमवल्यर्थं ऋणक्षेपः स्थाप्यः ष
ष्टिर्भाज्यः भूदिनानि हारः ततो गुणाप्तीलब्धाल

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ब्धि मिता कला: गुणाच्चं श शेषो ग्रिमवत्पर्यं
दे पस्याप्य: तत्र त्रिंशद्भाज्या एव मग्रे द्वादश
भाज्या: पुनर्भगणभाज्या विपरीप्य तीममेवा
र्थं मूलकुदेवाग्रे एवं ग्रहाहर्गणलाभार्थं कुट्ट
करीति निरूप्य सूर्यचंद्र दिवसलाभार्थमपित
माह न येति अधिमासाच्चावमास्ते षामग्र
गुणाभितं कलाशेषमेवं कलाशेषाल्लब्धि
कला: गुणो भागशेषं तद्भागशेष: शुद्धि
कुदिनानि हार: त्रिंशद्भाज्यं लब्धि भा
गा गुणो राशिशेषं द्वादशभाज्या: कु
दिनादि हार: [illegible]शेषं शुद्धि: फलं
राशय: गुणो भगणशेषं कल्पभगण
भाज्या: कुदिनादि हार: भगणशेषं
शुद्धि: फलं गतभगणा: गुणो हर्गण:
स्यादिति अस्योदाहरणानि प्रमोध्या
ये एवं कल्पाधिमासाभाज्योरविदिना
नि हार: अधिमासशेषं शुद्धि: लब्धि
र्गताधिमासा: गुणो गतरविदिवसा:
मकाभ्यां शेषाभ्यां। क्रमेण रवींदोर्दिवसालब्धं

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ते ऽथ प्रथम मभिसंधि ऽधिमासशेषं शुद्धिं कल्पाधिमासान्भाजं रविदिवसांश्च हारं परिकल्प वल्लीं द्वादश राशि द्वये जनितेल ब्धिमिताग तास्धिमासा गुणमिताश्च गता र्कदिवसा ज्ञेयाः एवमवम शेषं शुद्धिं कल्पावमानि भाजं चंद्रादिनानि च हारं परिकल्प गुणाप्तौ कुट्टकेन लब्धा लब्धिर्गतावमा गुणो गतेंदुदिवसा इति उपजाती ॥१६॥

एवं कल्पावमानि भाज्यानि चंद्रदिवसा हारऽवशेषशुद्धिः फलं गतावमानि गुणो गतचंद्रदिवसाः॥ करण०
एको हरश्चेद्गुणकौ विभिन्नौ तदा गुणैक्यं परिकल्प्य भाज्यं ऽग्रैक्यमग्रं कृत उक्तवद्यः संश्लिष्टसंज्ञः स्फुटकुट्टकोसौ ॥१॥

ऽथ संश्लिष्टकुट्टकमाह एक इति यत्रोद्देशे उद्देशकेन गुणकशेषयोर्द्वित्वं बहुत्वं वा हारस्य चैकत्वमुद्दिश्येत तत्र संश्लेषो नामकुट्टकस्तत्करणार्थं एक इति हरो भाजक ...

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

यदि सर्वत्रैकः स्यात् गुणकावुपलक्षणतया
शेषकौ च विभिन्नौ स्यातां द्वित्वं बहुत्वं वा स्याप्यु
पलक्षणं तदा गुणैक्यं गुणयोर्गुणानां वैक्यं भा
ज्ये परिकल्प्याग्रैक्यं शेषस्तयोस्तेषां चैक्यम
ग्रं शेषं क्षेपकं परिकल्प्य यदुक्तवदुक्तरीत्या
स्फुटकुट्टकः कृतोसौ संश्लिष्टसंज्ञो भवति
उपजातिः ॥१८॥ उदाहरणं कइति यो

उदाह- कः पंचनिघ्नो विहृतस्त्रिषष्ट्या
सप्तावशेषोथ स एव राशिः दशाहतः
स्याद्विहृतस्त्रिषष्ट्या चतुर्दशाग्रो वद
राशिमेनं अत्र गुणैक्यं भाज्यं अग्रैक्यं
शुद्धिः न्यासः १५।६३।२१ पूर्ववज्जा
तो गुणः ८ फलं २ गुणो हृतृष्ट हारा ८
च्छोधितो जातो राशिः १४ इति कुट्ट
कव्यवहारः॥

राशिः पंचगुणः स्वधिकष
ष्ट्या भक्तः सप्तशेषः स एव च दशगुणस्त
थैव भक्तश्चतुर्दशशेषः स्यात्तं क इति त
मेनं राशिं वदेत्यर्थः १८ उपजाति अत्रगुण
कौ ५।१०॥ शेषकौ ७।१४ भिन्नौ हार ६३ अत्रै

कइतिसंश्लिष्टतातत्रगुणैक्यं १५ भाज्यहार
६३ शेषैक्यं २१ क्षेपः त्रयाणां त्रिभिरपवर्त्त
ने ५।२१।७ दृढभाज्यहारयोर्मिथो विभा
गे लब्धी १।४ क्षेपं ७ खं चाधोधो विन्यस्य
कृतावल्ली ० ४ राशी ७ २८ दृढभाज्यहारत
ष्टौ ३ गु ० णे ७ दृढहारा २१ च्छोधिते
१४ जातो राशिः अयमेव पंचगुणः ७० त्रिघ

अथ गणितपाशे निर्दिष्टांकैः करण
सूत्रं स्थानांतमेकादिचयांकघातः
संख्याविभेदा नियतैः स्युरंकैः भक्तों
ऽकमित्यांकसमासनिघ्नः स्थानेषु यु
क्तो मितिसंयुतिः स्यात् ॥१॥

घ्निभक्तः ७० स एव राशीः १४ दशगुणः १४ तथै
व ६३ भक्तः शेषं २८ शुद्धिपक्षे लब्धिगुणौ २।
७ तत्तगणाभ्यां ५।२१ तष्टौ ३।१४ शुद्धिजौ स्तः स
एव गुणः १४ एवं गुणकशेषयोर्वहवो ऽप्युदाहर्त
व्याः ॥ इति कुट्टकाध्यायः अथ गणितसूत्रमव
तारयति अथेति पाशावदसुकरोद्धारत्वा
दस्य गणितपाशेति संज्ञा निर्दिष्टैरुद्दिष्टैरंकैः

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

संख्याया: करणार्थसूत्रं स्थानांतमिति ये
षामंकानां प्रस्थार: कार्यस्तेषुयावंत्येकद
शशतसहस्रादीनिस्थानानिभवंति तत्प
र्यंतमेकादिचयांकघात: कार्य: आदि: प्र
थमश्च यो वृद्धिचयो एकरूपावादिचयौ
येषां ते एकादिचयाई दृशा येकास्तेषांघा
तोमिथोगुणने थ्रयंभाव: उद्दिष्टांकीयस्था
न संख्यया एकादयएकोत्तरवृद्ध्यांका:स्था
प्यास्तेषांमिथोगुणनाकार्येति सघातोनि
यतैरंकै: संख्याविभेदा: स्यु: घातसंख्य
समा: प्रस्थारभेदाभविष्यंतीत्यर्थ: प्रति
भेदांचांकानांनैपत्यंप्रस्तारविन्यासादे
वलभ्य किंच सघातोकससमासनिघ्न उ
द्दिष्टांकयोगेननिघ्नोंकमित्यकसंख्यया
भक्तोलब्धिरूप: स्थाने घू द्दिष्टांकीये
कादशशतादिस्थाने ष्वधोधोयुक्तोविन्य
स्यमिलितोमिति संयुति: संख्यैक्यंस्यात्
इंद्रवज्रा॥१॥ श्रीरस्तु॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

उदाहरणं द्विकेति द्विकाष्टकाभ्यां २८ त्रिनवा
ष्टके ३९८ द्व्यादिनवांतैः २३४५६७८९ पृ
थक्पृथक्प्रस्तारकरणे कति संख्याभेदा
भवंति कियंतिय द्रे देवानेषां प्रस्तार इत्य
र्थः तत्संख्यकैक्यानिच कति प्रस्तारभेदा
नि विष्टांकानां योजने च कः संख्याजायत इ

अत्रोद्देशकः द्विकाष्टकाभ्यां त्रिनवाष्ट
केर्वा निरंतरं द्व्यादिनवावसानैः सं
ख्याविभेदाः कति संभवन्ति तत्सं
ख्यकैक्यानि पृथक् वदाशु २ न्या
सः २।८ अत्र स्थाने २ स्थानांतमे
कादिचयांकः ।।२ घातः २।। वं जा
तौ संख्याभेदौ २ अथ सएव घातोंक
समास १० निघ्नो २० कमिता २ भक्तः
१० स्थानद्वये युक्तो जातं संख्यैक्यं
११ द्वितीयोदाहरण न्यासः ३।९।८॥
त्यर्थः आशु शीघ्रं वद॥ उपजातिः॥ तत्रा
दौ द्विकाष्टकप्रस्ताराय न्यासः अत्र २।८ ए
कदशेत्यादि गणितया स्थान संख्या २ तद
वध्येकादिचयांकन्यासः ।।२ अनयोर्घातः

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

२ अथसंख्याभेदस्तथाच भेदद्वयवानस्य
प्रस्तार इत्यर्थः अथमेव घातो २ क २।८
समास १० निघ्नो २० कमित्यास्थान संख्यया
२ भक्तः १० लब्धं स्थानद्वये धो धो न्यस्तो १
मेलितो ११ - जातं संख्यैकं तथाच प्रस्तार
स्य संख्यैकस्य च प्रदर्शनं | २८ अथत्रिनवा
ष्टक प्रस्ताराय न्यासः ३। | ८२ ११ २।८॥
अत्र स्थानचयांतमेकादिचयांकन्यासः १।२।३
अत्रैकादिचयांकाः १।२।३ घातः ६ ए
वं जाताः संख्याभेदाः घातो ६ क समा
सा २ हतो १२ - कमित्या भक्तः ४ - स्था
नत्रये युक्तो जातं संख्यैकं ४४४ - तृ
तीयोदाहरणं न्यासः २३४५६७८९ ए
वमत्र संख्याभेदाः चत्वारिंशत्सहस्रा
णि शतत्रयं विंशतिश्च ४०३२० संख्यै
कं च चतुर्विंशतिनिखर्वाणि त्रिषष्टिप
द्मानि नवनतिकोट्यो नवनवतिलक्षाः
पंचसहस्राणि शतत्रयं षष्टिश्च २४
६३९९९९९७५३६०॥
एषां घातः ६ लब्धा प्रस्तारभेदसंख्या अथमे
व घातोकानां ३।९।८ समासेन २० गुणितो १२०

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

कमित्या ३ भक्तः लब्धं स्थानत्रये धोधोवि
न्यस्य मेलितं ४४४॰ जातं संख्यैक्यं प्रस्तार
स्य संख्यैक्यस्य च प्रदर्शनं यथा
अथ द्व्यादिनवांतानां प्रस्ताराय
न्यासः २।३।४।५।६।७।८।९।
अत्र स्थानाष्टकात्मेकादिचयांक
न्यासः १।२।३।४।५।६।७।८।९
यो घातः ४-३२॰ लब्धा प्रस्तारभे
द संख्या अयमेव घातोंकानां द्व्यादिनवा
तानां योगेन ४४ गुणितो १७७४-८० कसंख्य
या ८ भक्तः २२१७६०॰ लब्धं स्थानाष्टके धो
धो विन्यस्य मेलितं २४६३९९९७५३६० ए
षां स्थानानां निखर्वादिसंज्ञा मूले स्पष्टीकृत्य
लिखिता उदाहरणांतरमाह पाशेति या

उदाहरणं पाशांकुशाहिडमरूकक
पालशूलैः खट्वांगशक्तिशरचापयु
तैर्भवंति अन्योन्यहस्तकलितैः क
ति मूर्तिभेदाः शंभोर्हरेरिव गदासि
सरोजशंखैः ॥३॥

शो॰ नागपाशाख्यास्त्रविशेषः १ अंकुशः सृ
णिः २ अहिः सर्पः ३ डमरूकं डमरूवाद्यवि
शेषः ४ कपालं शवशिरोस्थि ५ शूलं त्रिशू

३२८
२३८
८३२
३४२
८२३
२८३
४४४

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

लं ६ षट्वांगः कापालिकधार्यः शस्त्रविशेषः ७ शक्तिः प्रसिद्धा ८ शरो वाणः ९ चापोधनुः १० एतैरन्योन्यविनिमयेन हस्तैर्वाहुभिः कलितैः धृतैरुपलक्षिताः शंभोः शिवस्य मूर्तिभेदाः कति भवंति तत्रदृष्टांततयोदाहरणांतरं पृच्छति हरेरिवेति गदा १ असिः खड्गः २ सरोजं कमलं ३ शंखः ४ एतैर्विनिमयेन चतुर्भुवाहुभुधृतैर्विलोप्यद्या मूर्तिभेदास्तद्वद्धरेरपि मूर्तिभेदसंख्या वाच्येत्यर्थः ॥ व-३॥

विशेषकरणार्थं सूत्रं याव स्थानेषु तुल्यांकास्तद्भेदैस्तु पृथग्युतैः प्राग्भेदा विहृतांभेदास्ते संख्येक्यंच पूर्ववत् ४

प्रश्नोद्दे — — द्विद्व्येकभूपरिमितैः कति संख्यकाः स्युस्तासांप्रतिं च गणकाशु समपृच्छत्वं प्रोभोधि कुंभिशरभूतशरैस्तथैकैश्चेदेकपाशमितिपुक्ति विशारदोसि ॥ ५॥

अत्रा प्रथानां दशकतयादशस्थानानितद्वंतमेकादिवयांकन्यासः १।२।३।४।५।६।७।८।९। १०।१२ अा घातः ३६२८ ८०० लब्धा मूर्तिभेदा

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

संख्याइयमुद्दिष्टांकानामेकादिदशांतानां समा
सेन ५५ गुणिता १२२५८४००० प्रक्रमित्या १०
भक्ता १२२५८४००० लब्धं दशसु स्थानेषु धो
धो विन्यस्य योजितं २२१७५२२२२९७७८२४००
जातं संख्यैक्यं॰ एवं हरेरपि मूर्त्तिभेदानयने त
त्र स्थानचतुष्कांतमेकादिचयांकन्यास: १।२।३।४।
एषां घात: २४ लब्धा मूर्त्तिभेदसंख्या सघा
तों २४ कसमासेन गुणितो २४० क्रमित्या ४ भ
क्त: ६० लब्धं स्थानचतुष्टये धोधो न्यस्तं मे॰
लितं ६६६६० जातं संख्यैक्यं ॥ अथ विष्णुमूर्ति
प्रस्तार: ॥ अथोद्दिष्टांके षु कतिपयांकसाम्ये
विशेषं सूत्रयति यावदिति उद्देशे कृते याव॰
तः स्थानेषु तुल्यांका भवंति तावत्स्थानानां॰
मित्या पृथक्पृथक् भेदा: साध्या: अथ तैर्भे
दैर्पूर्वैर्भिन्नैर्भाजकै: प्राग्भेदा: स्थानांत
मेकादिचयांकघातोत्पादिता भेदा भाज्या
विहृता विभक्ता लब्धसंख्याका भेदा: स्यु:
स्पष्टी भवंतीत्यर्थ: तत्संख्यैक्यं च पूर्ववदे
व न तत्र संस्कारांतरमपेक्षत इत्यर्थ: ॥ अनु
ष्टुप् ॥ ४ ॥ तदुदाहरति द्वीति श्लोकमुपरि

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA